# ॥ वाल्मीकि रामायण॥

## ४ किष्किन्धाकाण्ड

### अध्याय ४४

तदुग्रशासनं भर्तुर्विज्ञाय हरिपुङ्गवाः ।
शलभा इव सञ्चाद्य मेदिनीं सम्प्रतस्थिरे ॥ १॥

रामः प्रस्रवणे तस्मिन्न्यवसत्सहलक्ष्मणः ।
प्रतीक्षमाणस्तं मासं यः सीताधिगमे कृतः ॥ २॥

उत्तरां तु दिशं रम्यां गिरिराजसमावृताम् ।
प्रतस्थे सहसा वीरो हरिः शतबलिस्तदा ॥ ३॥

पूर्वां दिशं प्रति ययौ विनतो हरियूथपः ॥ ४॥

ताराङ्गदादि सहितः प्लवगः पवनात्मजः ।
अगस्त्यचरितामाशां दक्षिणां हरियूथपः ॥ ५॥

पश्चिमां तु दिशं घोरां सुषेणः प्लवगेश्वरः ।
प्रतस्थे हरिशार्दूलो भृशं वरुणपालिताम् ॥ ६॥

ततः सर्वा दिशो राजा चोदयित्वा यथा तथम् ।
कपिसेना पतीन्मुख्यान्मुमोद सुखितः सुखम् ॥ ७॥

एवं सञ्चोदिताः सर्वे राज्ञा वानरयूथपाः ।
स्वां स्वां दिशमभिप्रेत्य त्वरिताः सम्प्रतस्थिरे ॥ ८॥

नदन्तश्चोन्नदन्तश्च गर्जन्तश्च प्लवङ्गमाः ।
क्ष्वेलन्तो धावमानाश्च ययुः प्लवगसत्तमाः ।
आनयिष्यामहे सीतां हनिष्यामश्च रावणम् ॥ ९॥

अहमेको हनिष्यामि प्राप्तं रावणमाहवे ।
ततश्चोन्मथ्य सहसा हरिष्ये जनकात्मजाम् ॥ १०॥

वेपमानं श्रमेणाद्य भवद्भिः स्थीयताम् इति ।
एक एवाहरिष्यामि पातालादपि जानकीम् ॥ ११॥

विधमिष्याम्यहं वृक्षान्दारयिष्याम्यहं गिरीन् ।
धरणीं दारयिष्यामि क्षोभयिष्यामि सागरान् ॥ १२॥

अहं योजनसङ्ख्यायाः प्लविता नात्र संशयः ।
शतं योजनसङ्ख्यायाः शतं समधिकं ह्यहम् ॥ १३॥

भूतले सागरे वापि शैलेषु च वनेषु च ।
पातालस्यापि वा मध्ये न ममाच्छिद्यते गतिः ॥ १४॥

इत्येकैकं तदा तत्र वानरा बलदर्पिताः ।
ऊचुश्च वचनं तस्मिन्हरिराजस्य संनिधौ ॥ १५॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com